५१८४

नं. — ५१८४

नाम. — कात्यायन सूत्र व्याख्यानं
१२शाध्याय:

कर्ता. श्री याज्ञिक देव:

पत्र सं. — ३९ सं. ×

विषय: सूत्र पद्धति परिशिष्टं

1

कात्यायनसूत्रव्याख्यानद्वादशाध्यायः

८२

६ ॐनमोश्रीगणेशायनः ज्योतिष्टोम उक्तः इदानीं कृतिमंत्रपाठक्रमप्राप्तो द्वादशाहो निधी
यते तत्र कृतिपाठक्रमः सर्वे ह वै देवा अग्ने सदृशा आसुरित्यत्र ब्राह्मणेऽतिग्राह्यग्रहवि
धानं द्वादशाहे तान्वै पृष्ठ्ये षडहे गृह्णीयादिति तथा ज्योतिष्टोममंत्रानंतरं अग्ने पवस्व स्वपा इत्या
द्ययोतिग्राह्यग्रहमंत्राः तत्र तावद्धर्मातिदेशार्थमाह ज्योतिष्टोमधर्मा एकाहद्वादशाहयो
स्तद्गुणदर्शनात् धर्मशब्देनांगान्युच्यंते एतानि त्रीण्येव ज्योतींषि य एते त्रिवृत्पंचदशसप्तदशैक
विंशस्तोमा इति तांड्यश्रवणात् ज्योतिःशब्देन त्रिवृदादयः स्तोमा उच्यंते ज्योतींषि स्तोमा यस्मा
सौ ज्योतिष्टोमः सप्तमाणुक्तोऽग्निष्टोमस्तस्य धर्मा ज्योतिष्टोमधर्माः ते सर्वेष्वेकाहेषु द्वादशाहेषु
भवंति एकाहा एकसुत्या यज्ञाः द्वादशाहो द्वादशसुत्यो यज्ञः कस्मात् तद्गुणदर्शनात् तच्छब्दे
न ज्योतिष्टोमः परामृश्यते तस्य ज्योतिष्टोमस्य गुणास्तद्गुणाः तद्गुणानां ज्योतिष्टोमांगानां एका
हेषु द्वादशाहेषु च दर्शनात् यतः क्रतावन्यपरेषु वाक्येषु एकाहद्वादशाहयोर्ज्योतिष्टोमांगा
नि दृश्यंते तद्यथा एकाहे तावद् वाजपेये ऽन्त्यमप्रमरुभ्य उकुंभेष्वो वशां पृश्निमालभत इति मरुत्स
तस्मात्प्रागाहघृतहोता माहेंद्रग्रहमनु सवं सति तदस्यैव वपया प्रचरेयुरिति वशावपाप्रचारवि
धिपरे वाक्ये ज्योतिष्टोमिकं माहेंद्रं दर्शयति तथा तत्रैव सप्तदश प्राजापत्याः पशवो विहि

ताः अयस्समदश आजायस्मान्भूतान्भन्त इति तान्स्तुत्सा हंते पामा दघत्रमेत्रावरुणो
वामदेव्यमनुशंसतिन देषांवपाभिः प्रचरेयुरिति वपाप्रचरणविधिपरे वाक्ये ज्योतिष्टोमि
कानुक्ष्यविग्रहान्दर्शयति तथा तत्रैवा गृहीते माहेंद्रे प्रस्थमुपावहरन्तीति उपहूतायामि
डायामपउपस्य श्यमाहेंद्र ग्रहं गृह्णातीत्यत्र माहेंद्रं दर्शयति तथा द्वादशाहे तयत्रैव द्वाद
शाहेन मू[illegible]छंदसा यजत इति मन्त्रस्य एष मन्त्रात एव पूर्वस्य हो भवति समूढछंदा स्तदेंद्र
वायवाग्रान्गृह्णातीति ग्रहव्यूहके धिपरे वाक्ये ऐंद्रवायवाग्रत्वं ज्योतिष्टोमिकी सिद्धं दर्शय
ति तथा तं वै प्रातः सवने गृह्णीयाद[illegible]हीत्वेति तथा माध्यंदिने वैनं सवने गृह्णी
याद्राग्रयणं गृहीत्वेति षोडशिनो ग्रहणकाल विधिपरे वाक्ये प्रातर्माध्यंदिनः सवनयो ज्यो
तिष्टोमिकमाग्रयणं दर्शयति तथा त्रिग्नास्थान्मन्त्रस्य तान्वै प्रातः सवने गृह्णीयाद्राग्रयणं
गृहीत्वा माध्यंदिने वैना सवने गृह्णीयाद् छंगृहीत्वोपाकरिष्यन्वा पूतभृत इति तथा तेम
हेंद्रस्यैवानुहोमं हूयं तद्रस्य त्राम्यपरे ष्वाक्ये प्राग्रयणं छामा हेंद्रा[illegible]तिष्टोमिकानुद
र्शयति ननु ज्योतिष्टोमस्येतः प्रागनुक्तत्वात् ज्योतिष्टोमधर्मा एकाहद्वादशाहयोरिति क
थं वक्तुं शक्यते उच्यते धर्मवंतमग्निष्टोममुपदिश्य ज्योतिष्टोमधर्मा इति सूत्रं कुर्वन्नेतत्ता

पपतियएषधर्मवानुक्तएषज्योतिष्टोमइति एकाहद्वादशाहयोरित्सर्वैकाहेषुसर्वेषुद्वाद
शाहेष्वैकस्मिन्निति व्याख्येयं द्विवचनंचैकाहजात्यपेक्षया यतोयदेकस्मिन्नेकाहेधर्म
प्रवृत्तिकारणंतत्सर्वेष्वप्येकाहेष्वस्ति तच्चकिमितिचेत् धर्माणामनाम्नातानामव्यक्तत्व
सामान्येनचग्रहणमिति अन्येष्वहर्गणेषुद्वादशाहाद्धर्मप्रवृत्तिरिति वक्ष्यति तेनद्वादशा
हेएकस्मिन्निति व्याख्येयं ननुज्योतिष्टोमधर्माइत्युक्ते धर्माणामंगापरपर्यायाणांप्रवृत्तिर्भ
वतुनुऐंद्रवायवादीनांद्रव्यदेवतानां कथमिति उच्यते उद्भिदायजेतविश्वजितायजेतेत्या
दिषुयागमात्रंश्रूयतेनचद्रव्यदेवतंविनायागःसिध्यति अतोयागश्रवणान्यथानुपपत्त्या
द्रव्यदेवतस्यापिज्योतिष्टोमात्प्रवृत्तिर्भवतियत्रपुनर्द्रव्यदेवतासहितोवैकृतोयागोविहि
तोभवतितत्रतद्व्यतिरिक्तान्यंगानिप्रवर्तंते यथासौर्यंचरुं निर्वपेदग्नीषोमीयमजमाल
भेतेत्यादौ इहतुद्रव्यदेवतासहितस्यविधानात्तस्यापिनप्रवृत्तिर्भवति प्रधानंहियागमा
त्रंद्रव्यदेवतंतुतत्साधनत्वात्तदंगं अतोधर्मशब्देनद्रव्यदेवतमप्यभिधातुंशक्यतइति
युक्तातस्यापिप्रवृत्तिः यथायासुविकृतिषुपुष्टिमंतावाज्यभागौजीवत्वंतावाज्यभागौ
इत्येवमाज्यभागौविहितौतत्रप्राकृतयोराज्यभागयोरप्रवृत्तिः यत्रपुनरन्यौनविहितौतत्र

त्रयाणां तयोः प्रवृत्तिर्भवत्येवमेवमत्रापीति । अथानुमानिकवचनातिदेशः । अथास्या-
पवादो नामधेयातिदेश उच्यते । प्रथमस्य व्रात्यस्तोमसाध्यक्रेषु वचनात् । व्रात्यस्तोमाश्चत्वा-
र इति वक्ष्यति य[त्सा]ध्यः क्रतुरिति च । व्रात्यस्तोमाश्च साध्यक्राश्च व्रात्यस्तोमसाध्यक्राः । तेषु व्रा-
त्यस्तोमेषु साध्यक्रेषु च प्रथमस्य व्रात्यस्तोमस्य प्रथमस्य साध्यक्र[स्य] च धर्मा द्वितीयादिषु
व्रात्यस्तोमेषु द्वितीयादिषु च साध्यक्रेषु भवंति । प्रथमस्य व्रात्यस्तोमस्य धर्मा उत्तरेषु त्रि-
षु व्रात्यस्तोमेषु भवंति । प्रथमस्य साध्यक्रस्य धर्मा द्वितीयादिषु पंचसु साध्यक्रेषु भवंती-
त्यर्थः । कुतः वचनात् । उच्यते । निधीयतेऽनेनेति वचनं नामधेयं व्रात्यस्तोमसाध्यक्र इत्येवं रूपं
तस्मादित्यर्थः । यथा नामसाम्यात् सौमिकाद्[illegible]याद्[illegible] एम घासिके च भवत्येवं नाम एव भ्य-
थैव धर्मप्रवृत्तिरेवमत्रापीत्यर्थः । ननु प्रथमे व्रात्यस्तोमे प्रथमे साध्यक्रे च ज्योतिष्टोमधर्मा
एव भवंति । ततः को विशेषः । सत्यं ज्योतिष्टोमिकाः संति वैशेषिकाश्च । अतो वैशेषिकध-
र्मलाभार्थमिदं । पुनरपि ज्योतिष्टोममपि ध्यं तस्यापवादमाह । अग्निष्टुत्क्रतावेके । वक्ष्यति अग्नि-
ष्टुद् ब्रह्मवर्चसवीर्यान्नाद्यप्रतिष्ठाकामानामित्यादि । तत्र प्रतिकाममग्निष्टुतां भेद इति सिद्धां-
ते मनसि कृत्वाह । अग्निष्टुत्क्रतुर्वैक इति एके आचार्याः । अग्निष्टुत्क्रतुश्च प्रथमस्याग्निष्टुतो धर्मा द्वि-

द्वा २

क्र

र्चं

३

तीयादिषु भवन्तीत्याहुः कुतः वचनादेव नामधेयादेव अग्निष्टुदिति नामसामान्यादेवे
त्यर्थः ननु त्वास्य स्तोमसाधुः कथं अग्निष्टुत् बहुत्वमेव नास्ति एक एवाग्निष्टुत् तत्कथमुच्यते।
प्रथमस्य धर्मा द्वितीयादिषु भवन्तीति उच्यते तांड्य ब्राह्मणे हि एकमग्निष्टुतं विधाय एत
स्यैव रेवतीषु वारवन्तीयमग्निष्टो[illegible]मसाम[illegible]त्वा पशुकामो यजेतेत्येवमादीनि प्रतिका
मं वाक्यांतराणि प[illegible]ते तत्र एतैर्वाक्यैः संस्कृतेऽग्निष्टुति प्राकृते कर्मणि रेवत्सो वारवंतीयं पशवः
फलं इत्येतेषां त्रयाणां विधानं न संभवति कुतः वाक्यभेदप्रसंगात् तदुक्तं प्राप्ते कर्मणि
नानेको विधातुं शक्यते गुणः अप्राप्ते तु विधीयंते बहवोप्येकयत्नत इति अत[illegible]रेवतीषु
वारवंतीयमित्याद्यनेकगुणयुक्तं कर्मांतरमेव प्रतिकामं विधीयत इति सिद्धमग्निष्टुद्बहुत्वं
अतः साधूक्तं अग्निष्टुत्सु प्रथमस्य धर्मा द्वितीयादिषु भवंतीति प्रथमे ज्योतिष्टोमिकास्त्व
पि धर्माः संस्येव वैशेषिकप्राप्त्यर्थमिदं सूत्रं अथवा वचनादित्यस्यार्थांतरं वचनात् स्वस्य व
चनात् एतस्यैव रेवतीष्वित्यादेः एतस्य एतद्धर्मकस्येत्यर्थः यथा चातुर्मास्येषु अथैतान्येव
पंच हवींषि सन्त्रि एतानि एतद्धर्मकाणीति व्याख्यातं तथात्रापि घटत एव एकेन हणं पू
जार्थमतभेदाभावात् ज्योतिष्टोमधर्मा एकाहद्वादशाहयोरित्युक्तत्वाद्येष्ट ज्योतिष्टोमधर्मा

भवंतितेवक्ष्यमाणत्वाच्छ्रुतिमंत्रपाठक्रमात्समयमं द्वादशाहमाह द्वादशाहः सत्रमहीन
श्चो द्वादशाहो द्वादशसुत्योहर्गणः सत्रं सत्ररूपः अहीनरूपश्च भवति अहर्गणाद्द्विवि
धाः कानिचित्सत्राणि केचिदहीनाः तत्र द्व्यहप्रभृतयो द्वादशाहपर्यंता अहीना इति द्वा
दशरात्रादीनि रात्रिसत्राणीति वक्ष्यमाणत्वात् द्व्यहादय एकादशाहपर्यंता अहीना एव
त्रयोदशरात्रप्रभृतीनि सत्राण्येव द्वादशाहस्य तूभयमध्यपतनादुभयरूपता ननु तुल्ये
हर्गणत्वे कथमयं विवेको ज्ञायते इदं सत्रमयमहीन इत्यत आह आसत उपयंतीति सत्रलिं
गं श्रुतिवाक्ये यत्रासते उपयंतीति पदं एतत्सत्रमासते एतदुपयंति तस्यैवं तत्सत्रलिंगं सत्रत्व
ज्ञापकं चिह्नमित्यर्थः तद्यथा द्वादशाहमृद्धिकामा उपेयुः देवा ह वै सत्रमासत तेऽग्निष्टो
मं सत्रमुपेयुरिति यजत इत्यहीनस्य यत्र श्रुतिवाक्ये यजत इत्येतत्पदं तद्यथा तद्यथैत
द्वादशाहेन व्यूढच्छंदसा यजत इति तदहीनस्य लिंगं अहीनत्वज्ञापकं चिह्नमित्यर्थः द्वाद
शाहस्य तूभयलिंगदर्शनादुभयरूपत्वं लिंगलक्षणानंतरमाह उभयतोतिरात्रं सत्रं उभयत इत्या
द्यंतयोरतिरात्रो यस्य तदुभयतोतिरात्रं यत्र श्रुतिवाक्ये आद्यंतयोरतिरात्रः श्रूयते तत्सत्रं सत्र
संज्ञं तद्यथा अतिरात्रः षष्ठः षडहश्चत्वारः छंदोमा अतिरात्र इति तथा अतिरात्रो द्वादशाह

८

सप्तदशाहानि महाव्रतं चातिरात्रश्चेति अथवानेन सत्रेण सर्वसत्रेषूभयतोतिरात्रता विधीयते
सत्रमुभयतोतिरात्रं भवतीति उपरिष्टादहीनस्य यत्र क्रतिवाक्ये उपरिष्टाद्वृत्त एवातिरात्रः
अयं तेनाहीनस्य लिंगं अहीनत्वज्ञापकं चिह्नं अथवानेन सत्रेण सर्वाहीनेषूपरिष्टादंते
अतिरात्रो भवतीति विधीयते तेन द्व्यहादिपौंडरीकांतेष्वनुक्तोप्यतिमोतिरात्रः सि।
ध्यति द्वादशाहे त्वहीनात्मकेपि विशेषं वक्ष्यति उभयतोतिरात्र इति सत्राहीनसंज्ञाभेदो भे
देन धर्मविधानार्थः तद्यथा एको द्वौ बहवो वा अहीनेन यजेरन् दीक्षिता याजयेयुः सप्तदश
वरा चतुर्विंशतिपरमाः सत्रमासीरं दीक्षिता दीक्षितं याजयंतीति न भावमानवे उभयं द्वाद
शाहः सत्रमहीनश्चैको बहवो वापीवानोहानेन यजेरं स्तान दीक्षिता याजयेयुस्तेषां याजने।
द्रोषस्तयो दृशान्यामुपसन्नेको दीक्षितो गृहपतिस सप्तदशाः समानकल्पाः स्वयमृत्विजो ब्रा
ह्मणाः सत्रमुपेयुस्तेषां दानं निवर्त्तेताद्दितो वरणमिति लौगाक्षिरपि अथ सत्राहीनानां ज्यो
तिष्टोमेन धर्मा व्याख्याता विकारानमनुक्रमिष्यामो द्वादशदीक्षा द्वादशोपसद स्त्रेत्रीपक्षस्य
सप्तमी सत्राय द्वादशाहाया अहीनाय वा दीक्षते फाल्गुनिकस्येति लौगाक्षिरग्नीषोमीयानानि
पूर्वाणि कर्माणि सक्षक्रिमेरन् वभृथादीन्युत्तराणि पत्नीसंयाजांतान्यहान्यहरहरेव वर्तेर

८

नूनं त्वां नानीति लौगाक्षिः प्रातःसवने वशापाकरणं माध्यंदिने सवने प्रागच्छावाकस्तोत्राद्
सतीवरीग्रहणं यज्ञायज्ञियेवा पत्नीसंयाजान्ते संस्थिते वहतीवरीपरिहरणं सुब्रह्मण्या मा
क्वयेति वृषभेषणमिर्थावर्हिषः सन्नहनं सान्नाय्यदोहनं वशापाकरणं वा तिरात्रे संस्थिते उत्तर
स्याह्नः प्रक्रमणं सत्रमहीनो वा द्वादशाह एको दीक्षेत तः त्रयो दीक्षेरन्निति यथोक्तमहीनभूते दी
क्षेरन्यथासंख्यं सवनीया एकादशिना वान्वहमैन्द्राग्न उदयनीये द्वादशसु स्यादितिः अत्र यथो
क्तमिय यथाब्राह्मणे उक्तं तथेत्यर्थः तथा च काठकब्राह्मणं तस्मादेको द्वादशाहेन यजेत तस्मा
त्त्रयो द्वादशाहेन यजेरन् न तस्मात्स द्वादशाहेन यजेरं तस्माद्द्वादश द्वादशाहेन यजेरन्नित्याद्य
हीनात्मके ब्राह्मणं सत्रात्मके त्वेवं त्रयोदश दीक्षेरन्नेवं दश दीक्षेरन्सप्तदश दीक्षेरन्नेकविंश
ति दीक्षेरंश्चतुर्विंशति दीक्षेरन् सप्तविंशति दीक्षेरन् त्रिंशद् दीक्षेरन् त्रयस्त्रिंशद् दीक्षेरन् चतुश्च
त्वारिंशद् दीक्षेरन्नपरिमिता दीक्षेरन्नित्यन्ताः कर्तृसंख्याविकल्पाः यजमानाः सर्वे सत्रेषु सत्रे
षु यजमाना एव सर्वे ऋत्विजो भवंति य ऋत्विजस्ते यजमाना गृहपति सप्तदशाः सत्रमासीर
न्निति शाखांतरे श्रवणात् अत्र ऋत्विक्शब्देनार्त्विजीनाम्पदार्थानुद्दिश्य यजमानास्तत्कर्तृ
त्वेन विधीयंते तेन ये यजमानास्त एवं सर्वे त्विक्पदार्थान् कुर्वंतीत्यर्थः तथा च मानवे सर्वे सुत्वंतः

सर्वे यजमानभागं भजन्तीति अत्राग्निर्मे होता स मे होतेत्यादि ऋत्विग्वरणं न भवति तथा च जै
५ मिनिः वरणमृत्विजामानमनार्थत्वात्सत्रे न स्यात्स्वकर्मत्वादिति भृत्या परिक्रीय वशीकार
आनमनं शास्त्रदीपिकायां किंपुनरिदं वरणमुक्तं प्रार्थनमिति तच्च महर्त्विजां होतृकाणां
च मंत्रेण अग्निर्मे होता असौ मानुष इत्यादि अन्येषां च लौकिकया वाचा भवति प्रस्थाता मे भवा
नस्त्वित्यादिकया सत्रेषु तु वरणार्थस्यालोयान्निवृत्तिः तदभावे चाध्वर्युं गृहपतिं दीक्षयित्वेत्या
दिव्यवहारदर्शनात्संकल्पादेव होत्रादित्वसिद्धिः तंत्रटीकायां सत्रे तु स्वयंकर्तृत्वाद्वरणभरण
योरपेक्षितयोरग्रहणाद् नैव ताभ्यामवेगुणामिति योग्यतामात्रेण धर्मत्वादिसिद्धिरिति अ
न्ये त्वेवमाहुः छंदोगोक्तं दैवर्त्विग्वरणं देवयजनप्रार्थनं च भवति अप्रतिषिद्धत्वादविरोधा
दपेक्षितत्वाच्च अदक्षिणानि स्वामियोगात् चोदकप्राप्ताया दक्षिणाया निषेधोयं सत्राणि
चादक्षिणानि भवंति कुतः स्वामियोगात् अत्र हि स्वामिन एवार्त्विज्यं कुर्वंति न तद्व्यतिरिक्ता।
ऋत्विजो भवंति परिक्रयार्थं हि दक्षिणादानं अनुपपन्नं चात्मपरिक्रयः अपरिक्रीता एव
हि सर्वे यथात्मार्थेषु कार्येषु प्रवर्त्तंते अतः साधूक्तमदक्षिणानि सत्राणीति अथेदं चिंत्यते॥ ५
बहुषु यजमानेषु सत्सु किं सर्वे याजमानं कुर्युरथवा गृहपतिरेवेति संदेहे इदमाह गृहप

तियजिमानमयुक्तत्वात् अत्रयाजमानंयजमानसंबंधिकर्मगृहपतिःकरोति कुतः अयु
क्तत्वात् पदार्थांतरेतस्याविनियुक्तत्वात् तद्व्यतिरिक्तानांयजमानानांब्रह्मत्वादिपदार्थे
षुविनियुक्तत्वात् एकेनापिचयाजमानेकृतेयाजमानवान्प्रयोगोजातइतिनास्तिवैगुण्य
मितिगृहपतिरेव[illegible]र्यात् दर्शनाच्चनकेवलमयुक्तत्वात् अपितुगृहपतिर्याजमानंकरो
तीत्यस्यार्थस्यश्रुतौदर्शनाच्च तथाच[illegible]येतस्माद्यदिबहवोदीक्षेरन्गृहपतयएवव्रतमभ्युपे
[illegible]च्चमयपत्केयुरिति अस्यांश्रुतौबहुषुदीक्षितेषुसत्सुगृहपतेरेवतानूनप्त्रादानविधानादे
वमवसीयतेयद्बहुषुयजमानेषुगृहपतिरेवयाजमानंकरोतीति सर्वेसंस्कारान् हेतुश्चाप्यनु
पदेशश्चयद्यत्संस्कारकंयाजमानंयथावपनांजनपावनादिकंतत्सर्वेकुर्युः कुतःसंस्कारान्
तेनहियजमानाःसंस्क्रियंतेफलप्राप्तियोग्याःक्रियंते यस्यवसंस्कारोनक्रियतेतस्यतत्संस्का
रलोपाद्वैगुण्यंस्यात् तस्मात्संस्कारकंयाजमानंतत्सर्वेकुर्युः यद्येवंतर्हितस्यायदिबहवद्
स्यादितिदर्शनंकथमुपपद्यतइत्यतआह दर्शनेवचनात् दर्शनेवचनाद्गृहपतयेएकस्मैदानमु
क्तंन्यायतःसर्वेभ्य[illegible]वप्राप्नोति नास्तिवचनस्यातिभारः वचनंहिविधिमिवनकुर्यात्तत्स्याप्ययनु
योज्यत्वात् अपराव्याख्या दर्शनाच्च गृहपतेर्हिफलाधिक्यंदृश्यते सहिभूयिष्ठामृद्धिम्

तनु १

ध्नोतीति संस्काराधिकारादेव संभाव्यते अतो गृहपतिरेव याजमानं करोतीति प्राप्तस्त्वाह स
र्वे संस्कारान् पूर्ववदस्यार्थः दर्शने वचनात् यत्तु गृहपतेः फलाधिक्यं दर्शने श्रूयते स हि भूयि
ष्ठामृद्धिमध्नोतीति तत्तु वचनात् न संस्काराधिक्यात् अतः संस्कारकं याजमानं सर्वे कुर्युः
अविभवति गृहपस्यान्वारंभः अविभवति असंभवस्तनेककर्तृके पदार्थे वेदबंधनाग्न्यन्वा
धानमयाजानुमंत्रणादिके गृहपतेरन्वारंभः सर्वैर्यजमानैः कर्तव्यः तद्यथा वेदस्ताव[illegible]
[illegible] एकस्य प्रस्तौ च यजमानेन स्तृतः इह तु सर्वेषां तत्करणं न संभवति एकेन स्तृते न्यस्यक
रणासंभवात् अतो गृहपतिरेक एव करोति तस्य च कुर्वत इतरैरन्वारंभः कर्तव्यः एवं च सर्वैः
कृतं भवति परार्थेष्वेकः स्तृत[illegible]त् परार्थेषु यजमानकर्तृकेषु पदार्थेषु पात्रासादनाज्यावेक्ष
णादिषु एको गृहपतिरेव कर्ता भवति कुतः कृतत्वात् एकेनापि कृतः कृत एव यतः याज
मानं च त्रिविधं एकं केवलं कर्त्रर्थं अपरमुभयार्थं तृतीयं [illegible]र्थमेवेति तत्र यत्कर्त्रर्थं यथा
पात्रासादनाज्यावेक्षणादिकं तदेको गृहपतिरेव करोति मुख्यः कुर्यात् स एषां नीतिशब्दात
एव चायं पराबहवो गृहपतयस्तदा सर्वेषां मुख्यत्वादनियमेनयः कश्चित् करोति एवमनेकय
जमानकेषु हीनेष्वपि सर्वेषां यजमानानां मुख्यत्वाद्यः कश्चिदनियतः परार्थेषु [illegible] कर्ता भ

स्वा ४

भवति यच्चोभयार्थं अग्न्यन्वाधानवेदबंधनादिकं एकेन कृतत्वात्सर्वैश्च कर्तुं न शक्यते तेन स
र्वैरन्वारब्धो गृहपतिः करोति यच्च स्वार्थमात्मसंस्कारकमेव केवलमात्मार्थमेव वपनांजनम्र
नादिकं तत्सर्वेपि कुर्वंति शान्तापिस्वरयूपेष्टकोदुंबर्यादीनां प्रमाणं सर्वत्र गृहपतेरेव भ
वति परार्थत्वात् सर्वेपि याजमानं कुर्वंत आर्त्विज्यस्याविरोधेन कुर्युः कुतः आर्त्विज्यस्य
प्रत्यक्षविधानात् ये यजमानास्त ऋत्विज इत्यनेन स्वार्त्विज्यं यमानां प्रत्यक्षविहितं याजमा ना ५
नं तु चोदकप्राप्तं तेनार्त्विज्यमेव बलीयः अतः आर्त्विज्ययाजमानयोर्विरोधे सति आर्त्विज्यं तु ६
यथाश्रुतं कुर्युः याजमानं तु तदविरोधेन यथाकथंचित् यथा प्रायणीयातिथ्यादिषु आ।
घार्यवस्य हविर्ग्रहणस्यानुरोधेन मुष्टिविसर्जनं ग्रहणानंतरं पुनर्मुष्टिकरणं आशासाने
मयीदमिति यजमानो जपन्तीत्युक्तं तद्धौत्रस्यानुरोधेन तस्मिन्नुपहूत इत्यस्यान्ते जपः एवं स
र्वत्र ज्ञेयं तथा च शांखायनः आर्त्विज्यस्यादिप्रतिषेधेनाशक्येयोगपद्ये दीक्षणानुपूर्वेण स
र्वेषां याजमानं मुख्यः कुर्यात्सरार्थानि कल्पविप्रतिषेधे भूयसां साधर्म्यमिति लौगाक्षिरपि
सर्वे याजमानानि विप्रतिषेधे भूयसां धर्मानुग्रहः सर्वविप्रतिषेधे गृहपतेरिति मनुरपि
स्वकर्मविप्रतिषेधेन सर्वेषां याजमानमेकवदाम्नानमूहेत बहुष्विति तथा गृहपतिर्यज

मानंच ममसंभक्षयतीति अग्निं चेष्यमाणाः समारोप्य गृहपतिर्मध्यमं मथत्यईशउत्तरेदक्षि
णोत्तराः अग्निं चेष्यमाणाश्चयनं कर्तुकामाः स्वास्वानग्नीन् स्वस्वारण्योः समारोप्य प्राजापत्ये
ष्टकापशु यजनप्रदेशे आ[...] स्य गृहपतिर्मध्यमं मथति इतरे ब्रह्मादयो ईशइस्यद्वीत्यदक्षि
णोत्तरं मंथंति स्वस्वमग्निं अद्धो गृहपते दक्षिणतः अद्धो उत्तरत इति तत्रापि यथा
क्रमं प्रत्यासत्तिं मध्ये गृहपतिः गृहपतेरनंतरे दक्षिणतो ब्रह्म उ[...]ता गृहपते[...]त्तरतः ब्र
ह्मणो दक्षिणतो होता उद्गातु रुत्तरतो ध्वर्युः होतुर्दक्षिणतो ब्राह्मणाच्छंसी अध्व[...]त्तर
तः प्रस्तोता एवं सर्वेषामुपवेशने क्रमो वसेयः अथ दीक्षिष्यमाणाः समवस्यंति यद्यग्निं चेष्य
माणा भवंत्यरणिष्वाग्नी समारोप्योपसमायंति यत्र प्राजापत्येन पशुना यक्ष्यमाणा भवंति
मथित्वोपसमाधायोद्धृत्याहवनीय यजंत एतेन प्राजापत्येन पशुना तस्य शिरो निदधतीति
श्रुतत्वात् समवसंति एकस्मिन्देशे उपकरणानि विमुंचंति तेयद्यग्निमित्यग्नेर्विकल्पः तथा
चलौगाक्षिः सर्वत्र सत्राहीनैकाहेषु चित्यो न वा चित्यस्त्वेकेन प्रथमयज्ञे इति गृहपतिरेव प्र
थमो मंथते मध्यं प्रतिशालाया इत्यादि वक्ष्यमाणमविरोधादत्रापि गृह्यते तथा चैवं सूत्रका
रेणोहोपनिबद्धं प्राजापत्येन पशुनेति नियमार्थं अथ सिक्षांतरस्य निरासः गृहपत्याहवनी

येंगारमासनं सर्वेकुर्वंतीति शेषः स्वंस्वं गार्हपत्यं मथित्वा स्वस्वस्थाने स्थापयित्वा गृहपतेर्गा
र्हपत्यादध्वर्युणाहवनीयेनुद्धृते सति सर्वे दीक्षिताः स्वस्वगार्हपत्यादेकैकमंगारं तस्मिन्नाह
वनीये प्रास्यंति प्रक्षिपंति मथित्वोपसमाधायोद्धृत्याहवनीयं यजंत एतेन प्राजापत्येन प
शुनेति श्रुतेः गार्हपत्यं मथित्वा पृथक्पृथगुपसमाधाय स्थापयित्वा सर्वेन्यएकैकमंगारं
गृहपतेराहवनीये प्रास्येयु[illegible]नरमुद्धृत्याकुर्वत एतत् शाखांतरात् विशेषानभिधानात्तुल्यन्या
यत्वाच्च दक्षिणाग्नेरप्येवमेव संपादनं इति हरिस्वामिनः तत्र प्राजापत्यः पशुः तत्रएवं साधा
रणीत्वेने विहारे प्राजापत्य इष्टकापशुः कर्तव्यः यजंत एतेन प्राजापत्येन पशुना तस्य शिरो निद
धतीति श्रुतत्वात् प्राजापत्यग्रहणाद्वा प्राजापत्य एव इष्टकापशुर्नियमेन न पंचपशवो नापि
वायव्यः नाप्यनालंभपक्षोपि द्वादशाहप्रवृत्ति[illegible]च्च सर्वेष्वप्यहर्गणेषु प्राजापत्यस्यैव नियम इति
अत्रेष्टिपशुसंबंधीनि पात्राण्यपि साधारणान्यन्येवोत्सादनीयानि प्रदिकस्यैव यजमानस्य।
पात्रैः सत्रमारभ्यते करण[illegible]द्वैवादं तरात् तस्मिन्मते तत्पात्राणां प्रतिपत्ति[illegible]य कथ्येत तन्माभूदि
त्यन्यान्येव साधारणानि उत्साद्यंते सत्रं प्रारब्धं तदुक्तमभियुक्तैः समांशं द्रव्यमेकत्र कृत्वा
त्वीयांशदानतः पात्राण्यन्यानि पूर्वेभ्यः साधारणतया भजेत इति अत्र मानवे विशेषः सिद्धमा

प्रवराः प्रवराद्वैवं होतारं वृत्वा सर्वानवृणीते समानगोत्रानव्यवहितान् ऋत्वि[illegible]ति युक्तं व्यवहि
तानिश्च आ[illegible]लायनोपि आर्षेयाणि गृहपतेः प्रवरित्वा ब्रह्मादीनां मुख्यानामेवं द्वितीयप
त्ततीयचतुर्थानां यावंतोनंतरनर्हिताः समानगोत्रास्तावंतः सत्त्रदा वर्त्तये द्वेति अत्र विशेषमाह
आज्येन पत्नीसंयाजा गृहपतिवर्जं गृहपतिवर्जयित्वान्येषां सर्वेषां स्वस्वगार्हपत्ये आज्येन
पत्नीसंयाजा भवंति गृहपतेस्तु जाघन्यैव गृहपतेरेव गार्हपत्ये जाघन्या पत्नीः संयाजयंत्याज्ये
नेतरे नेमिति यजंत आसत इति श्रुतेः इतरे दीक्षिता आज्येन मति यजंतः प्रत्यालम साधार
णान्यजंत आसते सर्वे सत्रमेव नयंतीति अस्यार्थः अतो थादि हूनि ऋकलाखानि संस्कृत्य सर्वे
स्वयमेव स्वस्वगार्हपत्ये सहैव पत्नीसंयाजा कुर्वतीति संप्रदायः क्रमेण सर्वेषु धर्युरेव करो
तिश्री अनंतयाज्ञिकाः एवं पशुं समा[illegible]रवा संभरणार्थमेवमेवाग्नीन्मुथनस्तु कुर्यात् द्दहर्दी
क्षा पशोः शिरः सुगुप्ते देशे निधाय तद्दहरेव तस्मिन्निष्टका पशुदिन एवोखासंभरणं कृत्वा दी
क्षा कर्त्तव्या अत्र दीक्षायाः पशोश्चैककालता उच्यते तत्र दीक्षाकाले पशुः कर्त्तव्यो न पशुका
ले दीक्षा एवं कृते सोमस्य कालविरोधो न भवति इतरथा विरोधः स्यात् अशक्तौ नियतक्रि
या समारूढ निर्मथितेषु सर्वत्रा अशक्तौ पशुदीक्षयोरेककालेकरणाशक्तौ स्वकाले पशुं कृ

त्वासमारूढनिर्मथितेषु स्वस्वाग्निषु सर्वेषां नियतक्रिया नियतानामग्निहोत्रदर्शपूर्णमासा
दीनां क्रिया भवति तेषां यदि तदहर्दीक्षा न समेत्यरणिषु वाग्नीन्समारोप्य यथायथं विपरे
त्य जुहोतीति श्रुतत्वात् तथा च मानवे सावित्राणि हुत्वा अपादायाग्नीनथाग्निहोत्राणि
जुहुयुरिति पश्चात्ते च समारोप्य पादायाग्नीनथाग्निहोत्राणि जुहुयुरिति सर्वत्रेति न के
वलमस्मिन्पक्षे वक्ष्यमाणयोरपि पक्षयोरिष्टकापशौ दीक्षायाश्च यद्येकदिने करणशक्तिर्न
भवति तदाप्येवं कर्तव्यमित्येवमर्थं दीक्षाकाल उदग्वंशायां पूर्ववन्मंथनं दीक्षाकाले उदग्व
ंशायां शालायां पूर्ववद्दीक्षकाः पूर्ववन्मंथनं भाज्ञतमथनकाले सर्वे कुर्युः एतदुक्तं भवति समा
रोप्य गृहपतिर्मध्ये मंथत्सर्वे शरद्धतरे दक्षिणोत्तरा इति अथ यदहरेषां दीक्षा समेत्यरणिषु
वाग्नीन्समारोप्योपसमायंति यत्र दीक्षिष्यमाणा भवन्ति गृहपतिरेव प्रथमो मंथते मध्ये प्रति
शालायामथेतरेषामर्द्धा दक्षिणत उपविशंति अर्द्धा उत्तरतो मथित्वोपसमाधायेति श्रुतेः
शाला चात्र प्रागायता विंशत्यरत्निः सप्तधिकशतारत्निरुहीवा उदग्वंशा वनियमेन दी
क्षाकालश्चोक्तो मानवे चैत्रीपक्षस्य सप्तम्यां प्राग्वंशे सन्तु प्रदीक्षेरन्निति शंखायनोपि शुद्ध
पक्षस्याष्टम्यां द्वादशाहाय दीक्षन्त इति लौगाक्षिरपि चैत्रीपक्षस्य सप्तमीसत्रामद्वादशाहाया

श्रु ७

वं ५

हीनायवा दीक्षते फाल्गुनस्येति लौगाक्षिरिति विशेषमाह गार्हपत्ये प्रासनमात्रं अत्र दी

क्षाकाले सर्वे दीक्षिताः स्वस्वगार्हपत्यं मथित्वा स्वे स्वे स्थाने स्थापयित्वा न एवैकमुल्मुकमा

दाय सर्वे गृहपतेर्गार्हपत्ये प्रास्यंति प्रक्षिपंति मथित्वोपसमाधायैकैकमेवोल्मुकमाहा

योपसमायंति गृहपतेर्गार्हपत्य इति श्रुतत्वात् आहवनीयस्ततः नत इति प्रागुक्ते न प्रका

रेण साधारणी तनाद्गार्हपत्यादाहवनीय उद्धर्त्तव्यो दक्षिणाग्निरपि ततएव समानन्याया

त् गृहपतेरेव गार्हपत्यादुद्धृत्याहवनीयं दीक्षंते तेषां समान आहवनीयो भवति नानागा

र्हपत्यादीक्षोपसत्स्विति श्रुतत्वात् अत्रायं क्रमः सत्रे वरणाभावात्सर्वे यजमाना य आधिका

र ब्रह्मत्वादिपदार्थमंगीकृतस्य कर्तृत्वव्यवस्थां कृत्वा स्वस्वगृहे स्वस्वारणेषारन्यो समारोप्य एका

यध्वर्यमेकस्मिन्देशे आयंति तत्रागस्य मध्ये गृहपतिर्गार्हपत्यं मंथति इतरे उक्तप्रकारेण द्व

शो दक्षिणोत्तरा स्वस्वगार्हपत्यं मंथंति मथित्वा च स्वस्वस्थाने स्थापयंति ततो ध्वर्युर्गृहपति।

गार्हपत्यादिष्टकापश्वर्थमाहवनीयमुद्धरति ततो ब्रह्मादयः स्वस्वगार्हपत्यादेकैकमंगारमा

दायाहवनीये प्रक्षिपंति एवमेव दक्षिणाग्नेः साधारणस्योत्पादनं एवं विधे विहारे इष्टकाप

शुसमाप्याध्वर्युर्गृहपतिगृहपत्यादुद्धृत्य संभरणार्थमाहवनीयदक्षिणाग्नी उद्धरति ब्रह्माद

यष्ट्वा स्वस्वगार्हपत्यादेकैकमंगारमाहवनीये दक्षिणाग्नौ वा प्रक्षिपंति तत्रास्वासंभरणमजा
प्यसावसेकांतं स्वकाले इष्टकापशोः करणप्रक्षेउखासंभरणमपि स्वकाले क्षग्यामेव ततो दी
क्षाकाले सर्वे दीक्षिताः यथाधिकारं ब्रह्मत्वादिपदार्थकर्त्तव्यवस्थां कृत्वा देवयजनजोषणं
शालाकरणं परिवृतकरणं च कृत्वोखासंभरणं च दाहवनीयं साधारणं कृत्वा पूर्णाहुतिं कृत्वा
स्वस्वारण्योः स्वस्वानग्नीन् समारोप्य देवयजनमागत्य पूर्वया द्वारा शालां प्रविश्य संभारहरणा
नंतरं शालामध्ये गृहपतिर्मध्ये मथतीत्याद्युक्तप्रकारेण मथित्वा स्वे स्वे स्थाने स्थापयेयुः
ततो ब्रह्मादयः स्वस्वगार्हपत्यादेकैकमंगारं गृहपतिगार्हपत्ये प्रास्येयुः तत एवं साधारणी
कृता गार्हपत्यादध्वर्युः सत्रार्थमाहवनीयं दक्षिणाग्निं चोद्धरति तत्र दीक्षा तत्र एवं विध्येव विहा
प्र५ रे दीक्षा भवति उपवसथप्रभृति प्रागग्नीषोमप्रणयनादुपशमप्रविनोत्सेनां छालाद्वार्यां दक्षि
णोत्तरान् प्रभृति शब्दः सत्रस्य थे उपवसथे अग्नीषोमप्रणयनात्प्राक् पित्स्यवयनानंतरं
अध्वर्युर्ब्रह्मादीनां गार्हपत्यान् स्वप्रयत्नेनोपशमप्रानुगमयित्वा एतान् ब्रह्मादि गार्हपत्यान्
शालाद्वार्यदक्षिणोत्तरेण श्विनोति तेनैव क्रमेण अध्ययदहरे षांक्रयो भवति तद्दहगार्हपत्यं वि
तिमुपदधात्य थोत्तरेभ्य उपटसथेधिष्ण्यानि निक्षकृत्वा तूष्णां गार्हपत्यविति वदेवैकविंशतीष्ट

केपरिमंडलेवचमनेभासेत्याह धिष्ण्यवदाश्रुतेः धिष्ण्यवदेवचिनोति कुतएतत् श्रुतेः अथै

१० तरेभ्यउपवसथेधिष्ण्यानितिश्रुतत्वात् धिष्ण्यान् धिष्ण्यरूपान् अष्टेष्टकान्तनैकविंशतीष्ट

10 कानितिहरिस्वामिनः पितृभूत्याचार्यास्तुधिष्ण्यशब्दश्चतुरश्राकारवचनः तेनैकविंशती

ष्टकानेवधिष्ण्यवत् चतुरश्राकारांश्चिनोतिनपरिमंडलानित्याहुः ततश्चतेषांमतेषांमते

गार्हपत्यवितेः सेत्त्रांमंडलंवचतुरस्रंविकीर्षन्विकीर्षन्विघूर्भंपंचदशभागान्कृत्वाद्वाउद्दरे

द्भुषः करणीस्पनोनोपायेनचतुरश्रीकृत्यषोडशषट्मध्येऽपछिपश्रोणयऽसानूकापच्छेद

इत्सनेनप्रकारेणवक्रान्त्यपिसमवास्यपार्श्वाः साधनीयाः याज्ञिकास्त्वपिपितृभूतिवदे

वमारव्यातवंतः गृहपतिगार्हपत्यस्याप्येवमेवचयनप्राप्तिमाशंक्याह यथोक्तंगृहप

तेः गृहपतेर्गार्हपत्यस्यचयनंयथोक्तंभवतियथोक्तमितिसोम[illegible]सदिने स्वकालेएवप क ५

रिमंडलमेकविंशतीष्टकंचत्र्यश्रयद्रहरेषांक्रयोभवतितद्गार्हपत्यविधिमुपदधातीति

श्रुतत्वात् कर्काचार्यास्तुधिष्ण्यवच्चिनोतीतिपूर्वपक्षंकृत्वावायथोक्तंगृहपतेरितिसिद्धांत

परत्वेनव्याख्यातवंतः वाशब्दः पूर्वपक्षनिरासे यथागृहपतेर्गार्हपत्यस्यचयनमुक्तंतथैवब्र १०

ह्मादिगार्हपत्यानामपिपरिमंडलमेकविंशतीष्टकंच नधिष्ण्यवदितिधिष्ण्यशब्दः स्थानवच

नः धिष्ण्यानूस्थानानीत्यर्थः यन्नानाधिष्ण्या भवंति वरीयानाकाशोसत्स्यरिवरणायेति अस्या
र्थः यन्नानाधिष्ण्या भवंति तत्किमर्थं वरीयान्महानाकाशो वकाशः असत् अस्तु किमर्थं परि
चरणाय कस्य विदातुरस्य दीक्षितस्य परिचर्यार्थं नानाधिष्ण्येषु तु अवश्यमेवेदनुरूपा मह न३
ती शालाकर्तव्या तत्र चातुरः सुखं परिचर्यते पृथक्कृतैरग्निभिः पार्श्वतोग्निहोत्रं जुहुयादि
ठ१ त्यभिप्रायः तथा च वक्ष्यति तद्वा अस्मा[illegible]र्नानाधिष्ण्या एव स्युर्यद्दीक्षितस्योपतपेत् सार्वतो
ग्निहोत्रं जुहुयादिति अतो महत्यां शालायां तस्याग्निहोत्रहोमार्थं सुखेन स्थानं भवतीति ह
रिस्वामिनः १ आग्नीध्रीय उद्धृतेंगारमेकैव[illegible] हरंति । प्रतिविमितशालाद्वार्यात् आग्नीध्रीयेग्नौ
प्रणयनार्थमुपेते उत्क्षिप्ते ब्रह्मादयो यजमानाः साधारणात् शालाद्वार्यादग्नेः सकाशादेके
कमंगारं प्रतिविमितिस्वकीयं स्वकीयं गार्हपत्यचितिं प्रति रहेति नयंति स्थला च चिति मध्ये स्था
पयंति वैसर्जनानां कालेप्राच्यः पत्न्य उपसमायंति प्रजहत्येण न पण नग्नीहुतराववैसर्जिनेण
ज्ञानं प्रणयं स्युपतए वैष आग्नीध्रीयोग्निर्भवस्यथैतए कैकमेवोल्मुकमादाय यथाधिष्ण्यं विप
णयंतीति श्रुतत्वात् पत्न्यः प्राच्य उपसमायंति यथा स्वधिष्ण्यं संतएव युगपदुपागच्छंति विपरा
यंति विविधं परागमुखा गच्छंतीति प्रत्यग्निसवनीयपुरोडाशाभूयो हविरुच्छिष्टमसक्स्मास्या

इति श्रुतेः अग्निमग्निं प्रति प्रत्यग्नि सर्वेष्वग्निषु पृथक् पृथक् [illegible] सावनीयपुरोडाशा भ
वंति कुतः अथ यत्नानापुरोडाशा भूयो हविर्हविरुच्छिष्टमसत्समासा इति पक्षत्रयसाधारणे
नाश्रवणात् अतिशयेन बहुभूयो बहुत्वं हविर्हविरुच्छिष्टमसदस्तु भवतु किमर्थं समासे सत्र
समापनाय तद्धि अप्रेतो दीक्षिता जीवतः समापयंति इतरथा महांतं कर्मराशिमल्पेनाश
नेन न समापयेयुरिति अवन्हविःशेषादन्य आहारेणास्ति दीक्षितस्येति दर्शयन्तीति हरिस्वा
मिनः अत्र मुख्यत्वाद्गृहपतेः अग्नौ दुर्येष्वग्नौ सवनीयान्निर्वपति विरोधादन्य इतरे सुप्र
चारस्तु सर्वेषां सहैव भवति स्वंस्वं हविःशेषं भक्षयंति प[illegible]संयाजाश्च पूर्ववत् पत्नीसंयाजा
श्चाग्नीषोमीयसवनीयानूबंध्यपशुषु पूर्ववदिति ष्टका पशुवन्द्भवंति गृहपतेर्जघन्यामाइ
तरेषामाज्येनेति गृहपतेरेव गार्हपत्ये जाघन्या पत्नीः संयाजयंस्याज्येनेतरे प्रतियजंतस्मा
सत इति अविशेषेण श्रूतत्वात् दीक्षणीयायां तु गार्हपत्यस्य साधारणत्वात् तस्मिन्नेव पत्नीसं
याजानान्येषु एवमयमेकः पक्षः एतन्वेकमयनमिति श्रुतेः अथ द्वितीयं पक्षमाह गृहप
तिं वा पर्युपविश्य मंथंते अथवा गृहपतिं पर्युपविश्य इतरे ब्रह्मादयः सत्रिणो गृहपतिं
परि सर्वतो वेष्टयित्वा मंथंति गृहपतिः प्रथमं प्रथमं सर्वत्र सर्वत्र सर्वपक्षेषु गृहपतिः प्र

११ ३१

थमः प्रथमो मंथति पश्चादितरे मंथंति ननु सह जातं जातं गृहपतिर्गार्हपत्ये आस्यं तु भयत्र
उभयत्र इष्टकापक्षे दीक्षाकाले च जातं जातमग्निं गृहपतिर्गार्हपत्ये आस्यंति प्रक्षिपंति अरणि
स्थमेव स्वस्थाने अस्थापयित्वेवेत्यर्थः अथेदं द्वितीयमरणिष्वेवाग्नीन्समारोप्योपसमायंति य

श्र४ त्र प्राजापत्येन प[illegible]ना यक्ष्यमाणा भवंति मथित्वोपसमायोद्धृत्याहवनीयं यजंते एतेन प्राजाप
त्येन पशुना तस्य शिरो निदधति तेषां यदि तद्दह दीक्षा न समेत्सरणिष्वेवाग्नीन्समारोप्य यथाय
थं विपरेत्य जुहुत्यथ यद्दहरेषां दीक्षा न समेत्सरणिष्वेवाग्नीन्समारोप्योपसमायंति यत्र दीक्षि
ष्यमाणा भवंति गृहपतिरेव प्रथमो मंथते तरे पर्युपविश्य मंथंते ते जातं जातमेवानुप्रहरंति
गृहपतेर्गार्हपत्ये गृहपतेरेव गार्हपत्यादुद्धृत्याहवनीयं दीक्षंते तेषां समानत्वादाहवनीयो भ
वति समानो गार्हपत्यो दीक्षोपसत्स्विति श्रुतत्वात् उपवसथप्रभृति तुल्यं सर्वेषु सर्वेषु प
क्षेषु उपवसथप्रभृति तुल्यं समानं भवति यस्मात्प्रथमपक्षे उपदिष्टं उपवसथे प्रागग्नीषोमप्रण
यनादुपशमय्य चिनोतीत्येवमादि तत्सर्वेषु पक्षेषु भवतीत्यर्थः अथ यद्दहरेषां क्रयो भवति त
द्दहर्गार्हपत्यांश्चिन्वंति सुपदधात्यथेतरेभ्य उपवसथे धिष्ण्यानित्यादि कस्य सर्वेषु श्रुतत्वात् इति
द्वितीयः पक्षः एतद्द्वितीयमयनमिति श्रुतेः अथ तृतीयं पक्षमाह अरण्योर्वा[illegible]र्गृहपतेर्यइनो

ऊ१

१२

ग्निर्जनिष्यते स नः सहस्य दनेन यज्ञेन जेष्यामोनेन पशुबंधेन तन्नः सहस्नः साधुस्मानानापा।
पञ्चस्माय एव पापं करवत्तस्मै वन्तदित्युक्त्वा गृहपतिः समारोहयते स्वौ प्रथमं वा शेषो विकल्पा
र्थः अथवा गृहपतेररण्योरित्याहुः सर्वे दीक्षिता एनं वक्ष्यमाणं मंत्रमाहुः पठंति यइतोग्नि
रित्यादिकं गृहपतेररण्या आलभ्य इमं मंत्रं सर्वे पठेयुरित्यर्थः अमुं मन्त्रमुक्त्वा पठित्वा गृह
पतिः स्वावग्नी गार्हपत्याहवनीयौ प्रथमं समारोहयते ततो ब्रह्मादीनां सर्वेषां सत्रिणामग्
नी गार्हपत्याहवनीयौ गृहपतिरेव स्वारण्योः समारोहयते यथासंवेतरे अथवा इतरे ब्रह्मादयो
दीक्षिता यथास्वं स्वौ स्वावग्नी गार्हपत्याहवनीयौ स्वयमेव गृहपतेररण्योः समारोहयंते न गृहप
तिः अथेदं तृतीयं गृहपतेरेवारण्योः संवदंते यइतोग्निर्जनिष्यते स नः सहस्य दनेन यज्ञेन जेष्या
मोनेन पशुबंधेन तन्नः सहस हनः साधुस्माय एव पापं करवत्तस्मै वन्तदित्येवमुक्त्वा गृहप
तिरेव प्रथमः समारोहयते थेतरे अपः समारोहयति स्वयं वैव समारोहयंत इत्यादि श्रुतत्वात्
दीक्षाकाले संवादप्रभृति दीक्षाकाले संवादप्रभृति कर्म इष्टका पशुवत् भवति इयांस्तु विशे
षः पशुबंधस्थाने सत्रेणेति यइतोग्निर्जनिष्यते स नः सहेत्यस्मिन् संवादमंत्रे अनेन पशुबं
धेनेत्यस्य स्थाने नेन सत्रेण तन्न इति विशेषः अथ यदहरेषां दीक्षा समेनि गृहपतेरेवारण्योः सं

१२

वदंतइतिभक्क्यैवमेवक्ष्कतत्वात् संवादेनसमारोपेणवाग्नेः साधारण्यंभवतीत्यभिप्रायः।
अथोत्तमेपक्षेविकल्पांतरमाह एकाहवद्वोत्तमेशालागार्हपत्यपुरोडाशपत्नीसंयाजाःवाश
ब्दोविकल्पार्थः उत्तमेपक्षेएकाहवदग्निष्टोमवदेवशालागार्हपत्यपुरोडाशपत्नीसंयाजाभ
वंतिशालाएकाहवद्भवंतिप्राग्वंशाविंशत्यरत्निदीर्घादशारत्निविस्तारा तथायथाएकाहेए
काएवगार्हपत्यः एवमत्रापिएकएवगार्हपत्योभवति पुरोडाशाःसवनीयाएकाहव[illegible]वंतिए
कगुणाइत्यर्थः पत्नीसंयाजाश्चाप्येकाहवद्भवंतिजाघन्यैवएकस्मिन्गार्हपत्येऽयमेन
सत्रेणदेवाःक्षिप्रमेवपाप्मानम[illegible]घ्नतेमांजितिमजयन्येधामियंजितिसइतउद्यतएकग्र
हपतिकावैदेवाएकपुरोडाशाएकधिष्ण्याःक्षिप्रमेवपाप्मानमपाघ्नतक्षिप्रेप्राजायंततथाए
वैतएकगृहपतिकाएकपुरोडाशाएकधिष्ण्याः इत्यादिकमत्रहरिस्वामिनत्याहुः शालागार्ह
पत्यपुरोडाशपत्नीसंयाजाएकाहवत्कार्याइत्येतदेतेनकंडिकत्रयेणोच्यते येनसत्रेणाया
दृशेनेत्यर्थः एकगृहपतिकाइतिशाखांतरेबहवोपिगृहपतयोदृश्यंतेससदशावराश्चतु
र्विंशतिपरमाःसत्रमासीरन्नितितत्रहियेस[illegible]धिकास्तेगृहपतयोभवंतितन्निवृत्त्यर्थ
मेकगृहपतिवचनंकथंनामास्मिन्पक्षेएकएवगृहपतिःस्यादितिएकपुरोडाशाइत्येकश

१२

13

ढः समानार्थे नानात्वप्रतिपक्षे अथाहः पूर्वस्मिन्नुदीचीनवंशशाला भवतीति निंदार्थमपि प्र
वृत्तमिदमेव वचनं उदीचीनवंशत्वविधायकं हृदयं समानत्राहवनीय इत्येतन्नु स्मास्मेव
निंदार्थमनूद्यते अथाहः पूर्वस्मिन्नुदीचीनवंशं शाला भवतीति पक्षांतराणि निंदित्वा
आह अथात्र प्राचीनवंशं शाला भवति तद्देवत्रा समानत्राहवनीयो भवति समानो गार्ह
पत्यः समानत्राग्नीध्रीयस्तदेतत्रात्रं समरूढं प्रथैकाहः समरूढ एवं तस्य न ह्यनास्ति तस्मै येव
समान्या वृषदस्यद्विष्येभ्य इति अथात्र प्राचीनवंशे सेकाह्न एकाहपतित्वादि संनिधियोगे न नियम
विधिः समानो गार्हपत्य इत्यंतं समानत्राहवनीयत्राग्नीध्रीयश्चेत्यनुवाद एवाविकृष्टत्व
प्रदर्शनार्थः तस्य सत्रस्य एषैव तुल्यावृत्क्रिया यानन्तीयेमंथनमुपक्रम्यायेदं तताय
मित्यादिका सा किं सर्वैव तेन पक्षेणानुल्या अतत्राह यदन्यद्विष्येभ्यः धिष्ण्यविषया या आवृ
तोन्या या आवृत्संवादादिका सा समानीत्यर्थः तथा संवत्सरसत्रं प्रकृत्य श्रूयते सावित्रं हस्मैतं
पूर्वे पशुमालभंते यैनं हिं प्रजापतस्मिति प्रकृत्य तस्मात्संसुप्याग्नी स्तेन पूजेरनाह पतेरेवाग्नि
युपयेदं जायन्या पत्नीः संयाजयंतीति तस्मान्नाथसदिति ते तोय द्वानिका मंदीक्षंते तद्वा आहुनी
नाधिष्ण्या एव स्फर्यदि दीक्षित तस्यो पतये स्यार्थाता ग्निहोत्रं जुहृद् द्वसे स्त्य य घ गदेभवति सदृसो

१२

ज्यैन पुनरुपह्वयंते कस्मिंयते खैरेवतमग्निभिर्हं हं त्वग्रावाग्निभिरितरे यजमाना आसन्निति तद्
हैवाहिताग्नेः कर्मसमानधिष्ण्यास्त्वेव भंवंति तस्मात देवग्रामणं एवपुरश्चरणं इति श्रुतत्वात् त
था अथयेन संत्रेण देवा इति प्रकृत्य तथा एवैत एकगृहपतिका एकपुरोडाशा एकधिष्ण्याः
इति श्रुतत्वात् अस्मिन्पक्षे एक एव गृहपतिर्भवति न शाखांतरे एका बहवः अस्मिन्पक्षे यज
मानानां जीवनोपायमाह एकपुरोडाशेषु असंभवादैं पंचशरावमोदनं निर्वपेत्पुरोडा
शं वा यवौदनीयंतिमधपूपीयंतीति श्रुतेः एकपुरोडाशेषु एकगुणेषु सवनीयपुरोडाशेषु
सत्सु तच्छेषमात्रस्य सर्वेषां दीक्षितानां भक्ष्यासंभवाद्धताहत्वासंभवाद्भोजनपर्याप्तत्वासंभवा
दैं मिंद्रदेवत्यं पंचशरावमोदनं पंचशरावाणि समाणमस्यासौ पंचशरावः तं एवं भमाणं चरुं निर्व
पेत् अथवा पंचशरावं पुरोडाशमिंद्रदेवत्यं निर्वपेदग्नीन् ऊसएतत्र यमोदनीयंतिय घवपूपी
यंतीति शाखांतरे श्रवणात् ओदनमिच्छंति ओदनीयंति यदि दीक्षिता ओदनं खादितुमिच्छंति तदा पंच
शरावमोदनं निर्वपेत् यवपूपीयंति अपूपं खादितुमिच्छंति तदा पंचशरावं पुरोडाशं निर्वपेदि
त्यर्थः नवप्राकृते इगुणविधिरयं प्राप्तेकर्मानुवादेनानेकगुणविधानासंभवान् पक्षांतरे
बार्हस्पत्यविधानाच्च अतोयमपूर्व एव बार्हस्पत्यस्तेनेके एके आचार्या बार्हस्पत्यं बृहस्पति

देवतं पंचशारावमोदनं पुरोडाशं च कुर्वंति नैंद्रं बार्हस्पत्यपक्षे सवनीयपशावानंतरं पृथग
१४ स्य प्रचारो ऐंद्रदेवतत्वात् ऐंद्रपक्षे तु सवनीयेः सह वा समानदेवतत्वात् गुणाभेदाच्च दीक्षा
द्वादशाहस्यात्र द्वादशेऽहे द्वादशाद्दीक्षा भवंति उपसदश्च उपसदोपि चकाराद्द्वादश भवंति अ
ध्वर्युर्गृहपतिं दीक्षयति ब्रह्माणं दीक्षयत्य अध्वर्युः प्रथमं गृहपतिं दीक्षयति ततः क्रमेण ब्रह्मादी
न् ब्रह्मोद्गातृहोतॄन् दीक्षयति कांडानुसमयेन ते नाप्सु दीक्षा पांन खनि[...]तनादि मयादनां
तमेकैकस्य कृत्वा परस्य करोति नवनीतदीक्षायां याभ्यंजनादि भवेद्यानां तमेकैकस्य कृत्वा
जिनास्तरणा द्विदंड प्रदानां तमेकैकस्येति एवं पत्नीनामपि ज्ञे[...] तथा रुक्मप्रतिमोचनादिवा
स्स प्रांतमेकैकस्येति मानवसूत्रे तेषां गृहपतिः प्रथमो दीक्षते अथ ब्राह्मणं दीक्षयति अथो
द्गातारं दीक्षयति अथ होतारं दीक्षयतीत्युक्त्वा आहैतांश्चतुरोऽध्वर्युर्दीक्षयतीति एतच्च मा
ध्यंदिनीयायां गवामयने श्रूयते यद्यपि तथापि शाखांतरे द्वादशाहेपि श्रुतत्वाच्चार्येणेहोप
निबद्धं अध्वर्यो दीक्षति प्रस्थाता अध्वर्यो दीक्षतुरः अध्वर्युर्ब्राह्मणाच्छंसि प्रस्तोतृमैत्रावरु
णान् क्रमेण प्रतिप्रस्थाता दीक्षयति अथाध्वर्युं प्रतिप्रस्थाता दीक्षयति अथ ब्रह्मणो ब्राह्मणा १४
णाच्छंसिनं दीक्षयति ततः हि सोत्व पोद्गात्रे प्रस्तोतारं दीक्षयति ततः हि सोत्व पहोत्रे मैत्रावरु

णं दीक्षयति तं हि सोन्वेतां श्चतुरः प्रतिप्रस्थाता दीक्षयतीति श्रुतत्वात् प्रतिप्रस्थात्रादीन्ने
ष्टाः प्रतिप्रस्थात्रादीश्चतुरः प्रतिप्रस्थाता पोतारंनि हर्त्रुच्छावाकान्नेष्टा दीक्षयति अथाध्वर्यु
र्वे प्रतिप्रस्थातारं नेष्टा दीक्षयति अथ ब्राह्मणे पोतारं दीक्षयति तं हि सोन्वयो द्गात्रे प्रतिह
र्तारं दीक्षयति अथाध्वर्युं तं हि सोन्वय होत्रच्छावाकं दीक्षयति तं हि सोन्वेतां श्चतुरो नेष्टा दी
क्षयतीति श्रुतत्वात् नेष्टादीनुन्नेता नेष्टादीश्चतुरो नेष्टृन्नीत्सु ब्रह्मण्य ग्रावस्तुत उन्नेता दी
क्षयति अथाध्वर्युर्वे नेष्टारमुन्नेता दीक्षयति तं हि सोन्वय ब्रह्मण आग्नीध्रं दीक्षयति तं हि
सोन्वयो द्गात्रे सुब्रह्मण्यं दीक्षयति तं हि सोन्वय होत्रे ग्रावस्तुतं दीक्षयति तं हि सोन्वेतां
श्चतुर उन्नेता दीक्षयतीति श्रुतत्वात् उन्नेतारं ब्रह्मचारी स्नातको न्यो वा ब्राह्मणो न पूतः पावय दि
ति श्रुतेः उन्नेतारं ब्रह्मचार्यादीनामन्यतमो दीक्षयति कुतः अथोन्नेतारं स्नातको वा ब्र
ह्मचारी वान्यो वा दीक्षितो दीक्षयति न पूतः पावयेदिति स्याहुरिति श्रवणात् अन्यो वा ब्राह्मण इ
ति ब्राह्मणग्रहणात् स्नातकब्रह्मचारिणोरब्राह्मणोरपि ग्रहणमुन्नेतुः संबंधार्थं वा ग्रहणं ब्रह्म
चारी स्नातकश्चान्नेतुः संबद्धो यस्मादिति स्नातकश्चत्रयः स्नातका भवंतीत्यादि न्यायस्य कारणे
कः अनुपतिपत्नी उत्तर उत्तरः उत्तर उत्तरे दीक्षाकर्त्ता अनुपतिपति समीपे संनिधौ तत्समी

दीक्षयति अनुर्यक्षमयेति सामीप्ये अयमव्ययीभावो ननु पश्चाद्ध्येति तथा सति मन्त्रेति वक्तृत्वेन
भवति मन्त्रेतौ युगपत्स्याद्दीक्षाविहित अतोत्रापि तत्थैव युज्यते न यथाऽध्वर्युर्गृहपत्या
दीश्चतुरो दीक्षयति तस्य तन्त्रीः तेषां गृहपत्यादीनां चतुर्णां पत्नीः प्रतिप्रस्थाता दीक्षयति ततो
ध्वर्युर्दीक्षति प्रस्थातृ दीक्षयति तस्य तन्त्री नेष्टा दीक्षयति ततो नेष्टा प्रतिप्रस्थात्रादीश्चतुरो दीक्ष
यति तस्य तन्त्री हन्नेता दीक्षयति तत उन्नाता नेष्ट्रादीश्चतुरो दीक्षयति तस्य तन्त्री ब्रह्मचार्यादीनाम
न्यतमो दीक्षयति तएवोन्नेतुः तएव ब्रह्मचार्यादय एवोन्नेतुः पत्नी दीक्षयेयुः ब्रह्मचारी वपउ
न्नेत्रोपनीतस्नातकश्च यस्तेनोन्नेत्रोपनीयस्नापितश्च अन्यस्तु ब्राह्मणो येन केनविदुपनीतः स्ना
पितश्च अन्यो ब्राह्मणः स्नातकस्त्वादु ब्रह्मचारी स्नातकाच ब्राह्मणवपि गृह्यते अत्र छन्दोगसूत्रम
त्रेषु सर्वानध्वर्युर्दीक्षयेद्दीक्षिष्यमाणान्दर्शयेत्स्वस्थाने यम[illegible]धतीभवमुदपात्रं यएषोक्षिणी
पुरुषो दृश्यते नैतानि पराणयुः पश्यतीति तत्र दीक्षयेद्दीक्षिष्यमाणाः संवदेरं स्नहनः साधुस्न
स्नानानापापवृत्तसामास्मिन्सत्रे अथ यस्तु राव क्षमकृतस्मिश्च यथोपस्थितमेव न स्यादिति ते
षां दीक्षामध्य[illegible] पत्नीशालायां भोजनसंवेशने स्यातां उपवसथप्रस्तात्पत्नी ग्रीवे संधिवेलयोर्वा
चंयच्छेयुः विचक्षणं तां वाचं भाषेरन्न कं चनाभिवादयेरन्न [illegible]द्रेण संभाषेरन्नाधिस्म उन्न

येरन् ये परिगृहीतास्त्रयस्तान्मुख्यान्मेषु निवसुनोन्तयेरन्निरर्थः न प्रतीयाहूाय पत्नीशा
लायानि कामयेयुः मावं मुहं वंवोवारं कुर्वीरन् नदंतान्दर्शयेरन् नाहुतस्याश्नीयुः नैनानभ्यो
श्नतः पश्येत् सर्वेषां सवनानां माश्नीयुः क्रोधान्तं वर्जयेयुः एतानि व्रतानि दीक्षासु भवन्ता
त्सावासन्नीतादिति उद्यास्तमयावभ्याश्रवणं रबहिर्वेदि न्नसुते वर्जयेयुः आश्वलायनः अथ
सत्रिधर्मी दीक्षणादिपित्र्याणां दैवानां च धर्मीणां प्राग्रतानांति वृत्तः सर्वेरश्च वर्जयेयुर्ग्राम
चर्यासरणं विवृतशयनं स्त्राभिहासमनार्याभिभाषणमनृतं क्रोधम पांप्रगाहनामभिवर्षणं
च२ मारोहणं वृक्षस्य नावो वा रथस्य वा दीक्षिताभिवादनं दीक्षितस्योपसदउभौ सुत्वं तं समसि
द्धः पूर्वां रभिणमभितष्ठतरं वा सर्वसाम्ये यथावयोन्नगीतवादित्रानभ्यां श्वाव्रत्यो परवाएन्न
वैनान्बहिर्वेदि सतोभ्याश्रावयेयुरिति तर्वर्जयेयुरिति दक्षिणाकाले त्वक्षाजिनानि धून्वानाद
क्षिणापथेन जपंतो गच्छंति यन्मे गदायुषः परागितो गा त्वांते गद दक्षिणां नयामीति इममहममुमा
मुष्यायणममुष्य पुत्रममुष्याः पुत्रं कामाय दक्षिणां नयामीति दक्षिणाकाले दक्षिणावेलायां स
र्वं गृहपत्यादयो दीक्षिता त्वक्षाजिनानि धून्वानाः कंपयमानाः दक्षिणायाः पथा मार्गो दक्षिणा
पथः तेन दक्षिणापथेन दक्षिणामार्गेणांतरा शालासदसी दक्षिणे नाग्नीध्रं तीर्थेने स्तनेन य

१६

16

न्नेगदायुषइत्यमुंमंत्रंजपंस्तोगच्छेदिति अत्रमंत्रे सर्वेदाक्षिता अमुमित्यत्र द्वितीयांतं स्वना
मग्रहणं अमुष्यापरमित्यस्य स्थाने स्वपितामह संबंधित्वेन अमुकस्य पौत्र इत्येवं रू
पेण वा प्रपितामह वा विशेष्यं गोत्रप्रत्ययांतं द्वितीयांतं वा तथा अमुष्यपुत्रमित्यत्रामुष्ये
त्यस्य स्थाने षष्ठ्यंतं स्वस्वपितुर्नामग्राह्यं अमुष्याः पुत्रमित्यत्रामुष्या इत्यस्य स्थाने षष्ठ्यं
तं स्वस्वमातुर्नामग्राह्यं सत्रत्वाद्दक्षिणेपि आत्रेयमासपक्वैर्भोदानं प्रवर्त्तत एव तस्याप
रिक्रयार्थत्वात् तथा च मानवे दाक्षिणे होमो हुत्वेदमहं मां कल्याण्यै कीर्त्यै स्वर्गाय लोकाया
मृतत्वाय दक्षिणां ददामीति दक्षिणापथेनतस्त्राजिनानि धूर्वंतो हरहर एव्रजेयुः आसर्पकं
वदधुर्हिरण्यं वा सो गवाश्वादंन्यदिति काठके च अदक्षिणानि सत्राणि तेषु दक्षिणा संयु
क्तानि लुप्येरन्नपि वा दक्षिणावेलायां दाक्षिणे होमो हुत्वाल्लयं यजमानाय इदमहं मां क
ल्याण्यै कीर्त्यै यशसे ब्रह्मवर्चसाय स्वर्गाय लोकायामृतत्वाय दक्षिणां ददामीति तस्त्राजि
नानि धूर्वंतो दक्षिणापथेन गच्छेयुरिति शांखायनोपि हुतेषु दाक्षिणमेषु दक्षिणापथेनतस्त्रा
स्त्राजिनानि धूर्वंतो हरहरिसा व्रजेयुरिदमहं मां कल्याण्यै कीर्त्यै स्वर्गाय लोकायामृतत्वाय
दक्षिणां नयानीति सत्रायसत्रधर्मः अत एवाहीने द्वादशाहे न भवति मंत्रस्य दीर्घपाठः श्र

१६

स्वांतरीयत्वात् २ द्वादशाहे द्वादशैवोत्साम्यहानि भवंति तत्रोभयतोऽतिरात्रः ६ सत्रमित्यने
नास्यादिमांतिमे द्वे अहनी अतिरात्रसंस्थे तु केऽस्य येदानीं मध्यवर्त्तान्यहान्याह पृष्ठ्यः षडहः
प्रायणीयातिरात्रादनंतरं पृष्ठ्यसंज्ञकः षडहो भवति षण्णामह्नां समाहारः षडहः सर्वपृष्ठ
संज्ञः संज्ञाकरणं चत्वारोऽभिप्लवाः पृष्ठ्यश्च मासः इत्येवमादौ संव्यवहारार्थः अथ षडहमध्य
वर्त्तिनामह्नां संस्थाविशेषमाह प्रथमोऽग्निष्टोमः तत्र षडहे प्रथमः क्रतुरग्निष्टोमोऽग्नि
ष्टोमसंस्थो भवति चतुर्थः षोडशी तत्रैव षडहे चतुर्थः क्रतुः षोडशी षोडशिसंस्थो भव
ति उक्थ्या इतरे अस्मिन्पृष्ठ्ये षडहे इतरे प्रथमचतुर्थाभ्यामन्ये चत्वारः द्वितीयतृतीयपंच
मषष्ठा उक्थ्यसंस्था भवंति अत्र षडहे विशेषमाह तत्रातिग्राह्यग्रहणमन्वहं [illegible]र्वैग्ने पवस्वेत्या
त्रिष्वन्वहं अभिसन्वहमेकैकं तत्र पृष्ठ्ये षडहे पूर्वेऽह्नि प्रथमद्वितीयतृतीयेष्वहःसु वैकंक
तैः पात्रैः अतिग्राह्यसंज्ञकानां ग्रहणं ग्रहणं कर्त्तव्यं अन्वहं प्रत्यहं अग्ने पवस्वेत्यादि
भिर्मंत्रैः प्रतिमंत्रमेकैकं अतिग्राह्यं गृह्णीयात् अग्ने पवस्वेति मंत्रेण प्रथमेऽहनि उत्तिष्ठन्नो
जसेति द्वितीये अद्दश्रमस्मेति तृतीये तान्येव पृष्ठ्ये षडहे गृह्णीयात् पूर्वे त्र्यह आग्नेयमेव प्र
थमेऽहन्यैंद्रं द्वितीये सौर्यं तृतीये इति श्रुतत्वात् तथाच अथातो गृह्णात्येवाग्ने पवस्वस्व पाह्

तिक्रमेण त्रयोपि मंत्राः श्रुताः ग्रहणकालं तु परिशिष्टाद् दृश्यति अयं तु एतयोः उष्टविसत्र उ

१७ त्तरे वा गृह्णेति ग्नास्य [illegible] ग्रहणमित्यनुवर्तते अथवा एतस्य स्योत्तरे ग्रहे त्रयाणां मध्ये स

तु२ मूहे च [illegible] र्थे पंचमे षष्ठे वा गृह्यतीति ग्ना [illegible] हेति ग्नास्य ग्रहणं [illegible] नुवर्तते [illegible] व्यं तत्रापि प्रथम स्व२

अहवरे वा ग्रह मेकैकस्य ग्रहणं तथा च श्रुतिः एवमेवान्वहं तानुहैकउत्तरे ग्रहे गृह्णी

तीति अतश्च चतुर्थे आग्नेयं पंचमे ऐन्द्रं षष्ठे सौर्यमिति उभयोर्वा अथवोभयोर्ग्रहयो

रिति ग्नास्त्या नपृक्तीयान् यधुत्तरे ग्रहे गृह्णीष्व स्यात् पूर्व एवैनांस्माहे गृह्णीत्वा थोत्तरे ग्रहे गृह्णी

ते यादिति श्रुतेः अ[illegible]तिग्नास्य ग्रहणमित्यत्रानुवर्तते तत्रार्थवशाद् ग्रहयोरिति वचनं विपरिण

म्य संबध्यते महेन्द्रमनुहोमः तेषां पूर्वोक्तानामतिग्नास्त्यानां माहेन्द्रमनु माहेन्द्रग्रहहोमा

नंतरं होमः कर्तव्यः तेमाहेन्द्रस्यैवानुहोमठ हूयंत इति श्रुतेः अत्र धर्यो माहेन्द्रहोमेन्या ८५

नत्वादिति ग्नास्य होमः प्रतिप्रस्थात्रा कर्तव्यः अथवाध्वर्युरेव जुहोति अनुहोमे इत्युक्त्वा

द्विरेधाभावात् अतोध्वर्युरेव माहेन्द्रं हुत्वा सव्येन माहेन्द्रपात्रं गृहीत्वा तदानीमेव दक्षिणे

नातिग्नास्यं जुहोति वषट्कारेनुवषट्कारे च अग्नेर्वर्चस्विन्लिंद्रोजिष्ठ सूर्य भ्राजिष्ठेति भक्षणं १७

यजमानैः अग्ने वर्चस्विन्नित्यादिभिस्त्रिभिर्मंत्रैः क्रमेण त्रयाणामतिग्नास्त्यानां भक्षणं यज

मानैः कर्त्तव्यं तेषां भक्षोग्ने वर्चस्विन्नित्यादि श्रवणात् शाखांतरे याजमानो न भक्षयतीतिस्य
ष्टश्रुतं यजमानेन सह होमकर्त्तृ वषट्कर्त्रीरितिकर्काः भक्षयत इति द्विवचनं मानवेस्ति एष
काले रथसंसारणं प्रथमे दक्षिणेन वेदिं एष स्य प्रथमे ह्नि एष काले एषोपाकरण का
ले वेदिं दक्षिणेन वेदे दक्षिणस्यां दिश्यदूरे रथस्य संसारणं मात्र मुदं च वाचालनं कर्त्तव्यं अत्र
नयाभ्यां ग्ने हमु पस्ये स्येति मात्रतेनरणे सर्वत्र भवत एव रथसंसारणादीनामदृष्टार्थत्वात् अ
दृष्टार्थेषु समुच्चयस्य प्रागुक्तत्वाद् इमामंत्रेषु समुच्चय इति एवं वोपावर्त्तध्वमिति मंत्रतः मंत्रो
पि प्रावर्त्तनएवीच्यतएवहेतोः तथा च मानवे अन्वहं एषः षडहस्तायने तस्य स घस्त्रि वृग्नि ६ ७
ष्टोमो रथंतरसामा सिद्धमा बहिष्पवमानास्त्रायणीयो दयनीययोर्बहिःस्तुवते सदसीतरेषु
माहेंद्रस्य रथशब्देन दर्भाभ्यां स्तोत्रमुपाकरोति सर्वत्र एष्वाशिल्पेषु दर्भौ बहिर्वेदि रथं वर्त्तयती
ति तथा च काठके प्रायणीयादिनिरन्तरस्त्र्यः षडहः तस्याग्निष्टोमः प्रथममहरुक्थ्यानि तराणि
षोडशी चतुर्थे तस्य प्रथमे हनि रथशब्देन माहेंद्रस्तोत्रं उपाकरोतीति छंदोगसूत्रे एष सर्वथमति
वहेयुः पश्चात्सांबंदक्षिणतो वोदं च बहिर्वेदि रथं तरसौस्यंत्रे इति द्वितीये दुंदुभिशब्देनोपा
करणं द्वितीये हनि एष काले दुंदुभिशब्देन दुंदुभिघोषेणोपाकरणं कर्त्तव्यं तथा च मानवेपं

उ २

चतुर्दशः ष्टोमो बृहत्सामा दुंदुभिशब्देन स्तोत्रमुपाकरणीति दुंदुभिशब्देन द्वितीय इति काठके मा

१८ नवेष्वत्रापि प्रवर्त्तत एव तृतीय उपवाजनैः उपवाजना व्यजनकाः तेषु भवा वायव उपा

और २ वाजनास्तैः स्तोत्रे तृतीयेऽहनि एष काले उपाकरणं कर्त्तव्यं तथा च मनुः सप्तदश उक्थ्यो वैरूपसामो

18 पवाजनेन स्तोत्रमुपाकरोति काठके च उपवाजनेन तृतीय इति उपवाजयमानो वैरूपे

ण स्तुयुरुपवाजयमानो वेति छंदोगसूत्रे चतुर्थे अरणिभ्यां चतुर्थेऽहनि एष काले अरणिभ्यां स्तो

त्रमुपाकरोति अत्र मनुः एकविंशः षोडशी वैराजसामा अरणिभ्यां स्तोत्रमुपाकरणीति

काठके अरणिभ्यां च चतुर्थ इति मंथनं चोद्गातृरूपेण उद्गातृ दक्षिणे तु अरणि आधारभूते अरणिं निधा

य मंथनं चाग्नेः कर्त्तव्यं अत एव शकलनिधानं तृणनिधानं चोद्गातृरूपेण एव वक्तव्यात् तत्रारणिं॥

ने ४ स्थापयित्वा मंथनं कर्त्तव्यं अत एव विकल्प उभयथाश्रुतत्वात् अथवा प्रस्तु अध्वर्यूद्गातु ते ५

रेव कर्त्तृत्वं तदुक्तं यावदेकं श्रुतो कर्म स्मृतौ वा प्रतीयते तावत्तयोर्विरुद्धत्वात् छंदोगानुष्ठानमि

ष्यत इति तच्च समंत्रकं कुतः समंत्रकस्यैव तांड्यविधानात् मथ्यमानमेषा दिशैषाणमंत्रा

भावः कुत्राप्यनुपदेशात् छंदोगवेदिब्राह्मणे शांखायनाश्वलायनसूत्रयोरनुक्तत्वात् शक १८

लनिधानादिकं तूद्गातृकर्त्तृकं तस्य ब्राह्मणे पंचविंशकेऽस्य विहितत्वात् अध्वर्युकर्त्तृकं वा स

र्वसूत्रेषु तत्प्रदर्शनात् तथा च मनुः अश्वकामास्तीर्यो द्गासु रुण्वग्निं मंथतीति काठके च उ
द्गान्तु दूक्षिण्णमूलमष्टकाभिः प्रक्षाप्य तस्मिन्नरणिं निधायाग्निं मंथतीति होमश्च तस्य मथि
तस्याग्नेराहवनीये प्रक्षेपानंतरं यो होमो विहितोऽग्नावग्निरिति जुहोतिस्थात्माः स्रुवेण
निसोथत्रवद्वनाम्ह्वति तथा च मानवे तमध्वर्युर्भवतं नः समनसाविस्याहवनीये हुत्वाम
होत्रमग्न इति विराजाभिजुहोतीति काठके च तमुद्गातात्रिरभिहिंकृत्य सप्रस्तोत्रे प्रयच्छति
प्रस्तोताध्वर्यवे ध्वर्युरुत्तरेणाधिष्ण्यान्परिव्रज्य भवतं न इत्यग्नावनुप्रहृत्य प्रेहोत्रमग्न इत्यभि
हुत्येति छंदोगानामप्येवं विहितमस्ति ते वै कुर्वंति तर्हि तैरेव तत्तत्वान्नाध्वर्युणा पुनः कार्यं पं
च मे सावकापोद्पात्रात् एष स्य पंच मे हनि सावकपा[illegible]वाल संयुक्तया उद्पात्राद् एष काले स्तो
त्रोपाकरणं कर्तव्यं तथा च मनुः त्रिणवउत्स्यः शाक्वरसामाद्भिः सावकाभिः स्तोत्रमुपाकरो
ति संहारयमानाः स्तुवंति समाप्ते मार्जालीये निनयतीति छंदोगसूत्रे अपसावकाउपधा
यमहानाम्नीभिः स्तुवीरन्नोपयः सामांगं ब्रूयात्स उदघोषं जनयेदिति तथान्मद्भिश्चेदुपाकुर्यु
स्तानि नयेदा स्तावइति काठके चाद्भिरवकाभिश्चाभिः पवमइति षष्ठे सांवशिनेन एषस्य षष्ठ
ष्ठे हनि सांवाशिनेन एष काले स्तोत्रमुपाकरोति सांवाशिन शब्दस्याप्रसिद्धार्थवान्त्वयमेव

शो ६

तस्य व्याख्यानं करोति मातृभिर्वत्सामत्सं ठ संसृज्य सदः पूर्वेण आवर्त्तयंति सदः पूर्वेण सदसः

१९ पूर्वस्यां दिश्यदूरे समीप एव वत्सां संसृज्य स्वस्वमातृभिर्गोभिः संयोज्य आवर्त्तयंति विविधं

19 ध्वनयंति धेनूर्दक्षिणतः उत्तरतो वत्सान् तथा तेन तेन वा वत्साश्च यशब्दं कुर्वंति सशब्दः

सां वाशिनं शब्दार्थः तेन स्तोत्रोपाकरणं कुर्यादित्यर्थः तथा वलायायनः वारवंतीयस्य

स्तोत्रे धेनूः संवाशयेयुर्दक्षिणतः उत्तरतो वत्सान् समाप्ते स्तोत्रे पूर्वेण सदः संसृज्य

श्विमे नाग्नीध्रीयमुदीचीरतिसृजेयुरिति मानवेव त्रयस्त्रिंशद्वा रेवतसामाग वां सं

वाशिवेन स्तोत्रमुपाकरोतीति काठके च गोशब्देन षष्ठेव वत्सान्मातृभिः संवत्सयंतेति तां वत्स

रू८ त्तमुपाकरणमिति स्वयमृ[illegible]याजेज्या वीवमघेति षष्ठेहनि स्वयमृतुजेज्या स्तनुयाज्या।

याज्यास्त्र वीवमघेतायं लिंगादृध्युर्णस्वयमेव वक्तव्या न होतरेतद्यजेस्वं भैषेण हो

त्रा पाठनीयालिंगदियमध्वर्यो पञ्जा तथा वकाठके स्वयमनुयाजं ठ षष्ठमहरश्विनावध ८ ४

र्यूत्मा ध्वर्यवा हनुना सोमं पिबतामवीवमघेत्यादि वाजिनीवसू इत्य ध्वर्यो रिति एवं सर्वेषु सू

त्रेष्वस्ति होतृप्रस्यस्यः प्रतिगरः अस्मिन् षष्ठेह होतृप्रस्यस्यः प्रतिगरो भवति होतृवेदे १०

यत्र यत्र प्रागृशो विहितस्तत्र तत्र तथा भवतीत्यर्थः तत्र चतुर्थेहनि माहेंद्रग्रहस्य स्तो।

होतृशस्त्रस्य सः प्रतिगरः ई था उँई ओ ३ ओ ओ ई ओ ३ ओ ओ ओ उ ३ मोदैवेति प्रतिगरः यावतीषु ऋ-
क्षु संख्यास्तावतीष्ववसाने ईदृशः प्रतिगरः प्रणवे प्राप्ते ततः षोडशिनि विहृतासु ऋक्षु ओ था
मोदैवमदे इत्यवसाने मोदामोदैवो थो इति प्रणवे ततः षष्ठे हनि तृतीयसवने मैत्रावरुणस्या
स्य विग्न ह शस्त्रे विहृतासु ऋक्षु प्रवसाने ओ था मोदैवमदै इति प्रतिगरः प्रणवे व मोदामोदैवो
थो इति अविहृतासु प्राप्ते ततः ततो ब्राह्मणाच्छंसिनः शस्त्रे प्रतिगरे विशेषः तत्र विहितो नो

ड रसस्सूते स्याधा[illegible]त्रयो विंशतिसंख्यासु ऋक्षु न्यूखाः तत्र प्रतिगरः ओ ओ ओ ३ ओ ओ ओ ओ ३ ओ
ओ ओ ओ ओ ३ मदेथ मदैवो ३ ओ ३ ओ था मोदैवेत्यवसाने प्रणवे प्राप्ते ततः ततो राज्ञो विश्वजनीन
स्येति च तस्याः पारिक्षितस्यः आसां तृतीये पादे प्रथमचतुर्थयोरक्षरयोर्वैश्वर्यं तत्र ओ थामोदैवे
त्यस्मिन्प्रतिगरे पि प्रथमचतुर्थयोरक्षरयोर्वैस्वर्यमेव भवति ततश्चादित्सा हजरितरं गिरोभ्य
इत्याद्यासु वृत्तसु शस्यमानासु एवाहजरितरो था मोदैवेत्यवसाने तथा हजरितरो था मोदैवेति
प्रणवे ततः इहेत्य प्रागपागुदगधरागिति वतस्रः प्रवह्लिकासंज्ञाः नुगिस्त्रभिगतः इति तिस्रः प्र
तीराधाः आसां सप्तानां सप्तप्रतिगराः क्रमेण अस्ताबूनिजरितरो था मोदैव १ एषा तकानि
जरितरो था मोदैव रपि पीलिका वटोजरितरो था मोदैव २ अस्यक्छपलाशं जरितरो था मोदै

व ४ श्वाजरितरोथामोदैव ५ मरीसदोजरितरोथामोदैव ६ गोशफोजरितरोथामोदैवा
७ वीमेदेवाइत्यसांपन्नीयीयस्यमानाजरितरोथामोदैवेत्यवसाने १ होताविष्टीमेजरि
तरोथामोदैवेतिप्रणवेनतोयदैवासोललामगुमित्याघासुम्नूरवाः तत्रावसानेप्रतिगरः
विद्ददइई ३ इइइई ३ इइइई ३ किमयमिदमाहो ३ ॐ ३ ॐ थामोदैवेतिमासामण
वेमात्ततएवततोछावाकविग्नहशस्त्रेप्रवोमहेमतयोमंत्विस्यासूनूरवः तत्रावसानेप्र
तिगरः इहमदो ॐॐॐ ३ ॐॐॐॐॐ उमदेमधोमोदस्यमदिरस्यमदैवो ॐ ३ ॐ थामो
दैवेति विषुजिति सर्वपृष्टेऽप्तोर्यामेवैतएवप्रतिग[illegible]माकृतंचान्यार्थत्वादिरे षंमात्तंतव
प्रतिगरवा[illegible]प्रवर्त्ततएव ॐ थामोदैवेतीदं कुतः इतरेषां प्रतिगरपदानामन्यार्थत्वाबूत्स
हशार्थत्वादिसर्थः अद्दशार्थेषुसमुच्चयस्योक्तत्वाद्धर्ममात्रेषुसमुच्चयइत्सत्र तथार्थेवो
द्दात्दतंसर्वप्रतिगरवाक्येषते ॐ थामोदैवेतिएवंवानेनैवन्यायेनमात्तत्समुपाकरणंवसर्व
त्रप्रवर्त्ततेचरणाभ्यामितिउपावर्त्तध्वमितिवरथसंसारणादीनामन्यार्थत्वादिति षडहांतेन
बहुवदेत् षडहांतेएकस्यषडहस्यांतेबहुनवदेत् क्रतुविषयमन्यत्वननुषडहांतइतिन
वक्तव्यंषडहस्यप्रस्तुतत्वात् इतिचेत् उच्यते समुदितस्यषडहस्यांतएवयथास्यान्नविहत

२० २०

षष्ठ्यां तद्दृस्येवमर्थं पुनः षडहांतद्दृसु कंगवामयनादिषु च प्रतिलोमेपि षडहे तदंत एव
न त्रयस्त्रिंशस्य पूर्वेक्रियमाणस्यांते अव्यवहितषडहाभ्यासेव सर्वांते अभिप्लवादिव्य
वहितषडहाभ्यासेव प्रतिषडहं नान्यं प्रच्छेन षडहांते किमप्यन्यं न प्रच्छेत् ऋतुविषय
मन्यद्व नान्यस्मै प्रब्रूयात् अन्यस्मै पृष्टेन प्रब्रूयात् प्रतिवचनमपि न दद्यादित्यर्थः वाग्य
मनमेव कुर्यादित्यर्थः मधोः प्राशनं घृतस्य वा संस्थिते षडहे सर्वैर्दीक्षितामधो मधुनः
प्राशनं कुर्युर्घृतस्य वा प्राशनं कुर्युः वचनाद्दीक्षितानामपि मधुशनं भवतीति मामांसकाः
तथा च मानवे संस्थिते षडहे मधु अश्नंति घृतं चेति का[illegible]केच दृष्टे संस्थिते मधु घृतं वा शि
त्वा वाग्यता भवंत्योत्तरस्याहः प्रक्रमणादिति नियमान्नामिदमवधिविधानं छंदोगसूत्रेषु
षष्ठे हनि संस्थिते बहुवादिनः स्युर्न वाधीयीरन्नोत्तरस्याह्न उपाकरणादिति उपाकरणं
प्रारंभः अत्र प्रतिषेधादन्येष्वहःसु संस्थितेष्वध्ययनं कुर्युरिति गम्यते तथा सर्पिर्मधुना
मध्विजो भोजयेदहीनेषु अन्यतरेण वा सर्पिषैव तृतीयसवने सत्रेष्विति उक्थ्यं छंदो
मास्त्वय उत्तरे षडहा द्वितरे षडह समास्यनंतरं त्रयः ऋतव उक्थ्या उक्थसंस्था छंदोमा
इत्येवं संज्ञा भवंति तथा च मानवे उक्थ्यश्छंदोमास्तायंते वतुर्विंशश्च तुश्चत्वारिंशः शोष्टा

छ१

२१

चत्वारिंश इति अत्यग्निष्टोमो विवाक्यं दशमं चतुर्थं स्तोमसंज्ञस्त्यग्निष्टोमसंस्थं अ
विवाक्यं दशममहर्भवति तथा च कारके चत्वारः षड् स्तोमास्तेषां त्रय उक्थ्या अग्निष्टोमो वि
वाक्यश्चतुर्थस्तस्मिन्न प्रतिभां मत्यः स्पष्टरिक्थिं त्वा मत्यस्येदिति तथा च मानवे चतुर्विंशो
ग्निष्टोमो दशममहर अविवाक्यं तस्मिन्न पहतापः मतिरूपैः शब्दैः परिहरेयुस्तथा चेन्न शक्नु
